Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : BFSM-07**

# स्नातकपरीक्षाः–२०१६

## बि.ए.१ – विद्वन्मध्यमा -प्रथमवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः - २, पत्रिका -३

### विषयः - न्यायप्रकाशः, भाट्टकौस्तुभः(द्वितीयपादः)

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन उत्तरं लिखत** **01 x 10 = 10**

१. मीमांसाशास्त्रे कति अध्यायाः सन्ति ?

२. शाब्दीभावना नाम का ?

३. विशिष्टविधेः उदाहरणं किम् ?

४. सन्निपत्योपकारकस्य निर्वचनं कुरुत ।

५. नामधेयानां कथमर्थवत्त्वम् ?

६. अर्थवादाधिकरणस्य प्रथमं सूत्रं किम् भवति ?

७. भाट्टकौस्तुभग्रन्थस्य कर्ता कः ?

८. औदुम्बराधिकरणस्य विषयवाक्यं लिखत ।

९. मन्त्राणां कथं प्रामाण्यमित्यङ्गीकृतं मीमांसकैः ?

१०. हेतुवन्निगदाधिकरणस्य विषयवाक्यं लिखत ।

**II. वाक्यद्वयेन उत्तरं लिखत** **02 x 05 = 10**

१. न्यायप्रकाशग्रन्थस्य मङ्गलश्लोकं लिखत ।

२. प्रतिषेधस्य पर्युदासस्य च भेदः कथं निर्णीयते ?

३. नामधेयनिमित्तानि कानि नाम लिखत ।

४. शास्त्रदृष्टविरोधः कुत्र भवति ? एकैकं उदाहरणं देयं भवति ?

५. स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधिविषये वाक्यद्वयं लिखत ।

**III. सङ्क्षेपेण चतुर्णामुत्तरं लिखत** **04 x 05 = 20**

१. विनियोगविधेर्लक्षणं विलिख्य श्रुतिलिङ्गप्रमाणं निरूपयत ।

२. क्रमबोधकप्रमाणानि कानि ? विवृणुत ।

–अनुवर्तते

३. प्रकरणप्रमाणं प्रतिपादयत ।

४ स्त्रीणां यागेऽधिकारः अस्ति न वेति विवेचयत ।

५. विधित्रैविध्यं निरूपयत ।

## IV. उत्तरं लिखत 06 x 10 = 60

१. भावनाविषये लिखत ।

२. अङ्गत्वबोधकप्रमाणानां बलाबलं चिन्तयत ।

३. विधिनात्वेकवाक्यत्वास्तुत्यर्थेति विधीनां स्युः' इति मूलसूत्रविवरणं कुरुत ।

४. मन्त्राधिकरणस्य सिद्धान्तप्रतिपादनं कुरुत ।

५. औदुम्बराधिकरणस्य पूर्वोत्तरपक्षं वर्णयत ।

६. परिसङ्ख्या सूत्रविवरणं कुरुत ।

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : BFSM-08**

# स्नातकपरीक्षाः–२०१६

## बि.ए.१ – विद्वन्मध्यमा -प्रथमवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -२ , पत्रिका -४

## विषयः - भाट्टदीपिका (१-२अध्यायौ)

**दिनाङ्कः** - 05-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन उत्तरं लिखत** **01 x 10 = 10**

१. भाट्टदीपिकाग्रन्थस्य कर्ता कः ?

२. अर्थवादाधिकरणं कस्मिन्नध्याये कस्मिन् पादे निरूपितमस्ति ?

३. धर्मबोधकानि प्रमाणानि कानि ?

४. द्वितीयाध्याये प्रतिपाद्यविषयः कः ?

५. गौणिनिमित्तभूतानि प्रमाणानि कानि ?

६. मन्त्रप्रामाण्यं कथं ? वदत ।

७. सङ्ख्यया कर्मभेदः केन विषयवाक्येन निरूप्यते ?

८. यजेत जुहोति ददाति इत्यत्र कथं भेदः उच्यते ?

९. स्वर्गादिफलं प्रति धात्वर्थस्य कारणत्वं उत उपपदार्थस्य सोमादेरिति लिखत ?

१०. मीमांसका धर्मत्वं यागादीनां उत यागजन्यफलानां वदन्ति ?

**II. वाक्यद्वयेन उत्तरं लिखत** **02 x 05 = 10**

१. अर्थवादाधिकरणस्य विषयवाक्यं किम् ? तत्र संशयः कः ?

२. विरोधाधिकरणस्य विरोधः कुत्र इति लिखत ।

३. व्याकरणप्रामाण्यं नियमद्वयार्थं इत्युक्तम् । तौ नियमौ कौ ? लिखत ।

४. वैश्वदेवशब्दः गुणविधिः कर्मनामधेयं वा ?

५. स्तोत्रशस्त्रपदस्य निर्वचनं कुरुत ।

**III. सङ्क्षेपेण चतुर्णामुत्तरं लिखत** **04 x 05 = 20**

१. स्मृत्यधिकरणमारचयत ।

२. तद्व्यपदेशाधिकरणमारचयत ।

–अनुवर्तते

३. यजमानप्रस्तरः इत्यत्र विधिर्वा अर्थवादो वा लिखत ।

४. गुणात् कर्मभेदः कुत्र ? विवेचयत ।

५. उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां इत्यत्र कथं कर्मभेदः ? विवेचयत ।

## IV. उत्तरं लिखत 06 x 10 = 60

१. अर्थवादाधिकरणमारचयत ।

२. हेतुवन्निगदाधिकरणं निरूपयत ।

३. तत्प्रख्याधिकरणं प्रतिपादयत ।

४. वाक्यशेषप्रमाणं निरूपयत ।

५. शब्दान्तरात् कर्मभेदं प्रतिपादयत ।

६. टिप्पणीः लिखत

१. धर्मः    २. भावना

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : BSSM-07**

# स्नातकपरीक्षाः–२०१६

## बि.ए.२ – विद्वन्मध्यमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -२ , पत्रिका -३

### विषयः - भाट्टकौस्तुभः प्रधमाध्यायतृतीयपादः

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. लघूत्तराणि लिखत** **01 x 10 = 10**

१. आचाराणां धर्मप्रामाण्यं कथं सिद्ध्यति ?

२. यवशब्दस्य आर्याणां कुत्र शक्तिः? अन्येषां कुत्र ?

३. कल्पशब्दार्थः कः ? उदाहरणं किम् ?

४. भाट्टमते आकृतिशब्दार्थः कः ?

५. कल्पादेः धर्मप्रामाण्यं कथम् ?

६. पिक, नेम, सतशब्दानां म्लेच्छेषु कुत्र प्रसिद्धिः ?

७. आचाराणां धर्मप्रामायं कथम् ?

८. वार्तिककारमते श्रुतिविरुद्धस्मृतीनां प्रामाण्यं कथम् ?

९. भावना कति विधा ? लिखत ।

१०. अपूर्वस्वीकारे किं प्रमाणम् ?

**II. अष्टानामुत्तराणि लिखत** **08 x 05 = 40**

१.विरोधाधिकरणे भाष्यकारसिद्धान्तमनुवदत ।

२. शिष्टकोपाधिकरणे वार्तिककारसिद्धान्तमनुवदत ।

३. यववराहाधिकरणं सङ्क्षेपेण अनुवदत ।

४. कल्पसूत्राणामप्रामाण्ये युक्तीः प्रदर्शयत ।

५. होलाकाद्याचाराणां धर्मे प्रामाण्यमस्ति नवेति विमृश्य लिखत ।

६. व्याकरणाधिकरणपूर्वपक्षयुक्तीः लिखत ।

–अनुवर्तते

७. लोकवेदयोः शब्दार्थत्वं भिन्नमुताभिन्नमिति ग्रन्थोक्तदिशा सङ्क्षेपेण लिखत ।

८. आकृतिस्तु क्रियार्थत्वात्-सूत्रार्थं लिखत ।

९. महाभाष्योक्तानां व्याकरणस्य पञ्चप्रयोजनानां  खण्डनयुक्तीः प्रदर्शयत ।

१०. शिष्टाकोपेऽविरुद्धमिति चेत्- सूत्रार्थं निरूपयत ।

## III. पञ्चानामुत्तरं लिखत 05 x 10 = 50

१. स्मृत्यधिकरणं सङ्क्षेपेण विवृणुत ।

२. आकृत्यधिकरणसारं विवृणुत ।

३. स्मृत्यधिकरणे वार्तिककारसिद्धान्तं सङ्गृह्य लिखत ।

४. विरोधाधिकरणं सङ्क्षेपेण लिखत ।

५. धर्मप्रमाणान्यधिकृत्य लघुटिप्पणीमारचयत ।

६. शिष्टाकोपाधिकरणं विमृश्य लिखत ।

७. पिकनेमाधिकरणसारं विवृणुत ।

८. तृतीयपादस्य (स्मृतिपादस्य) सारं सङ्गृह्य लिखत

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : BSSM-08**

# स्नातकपरीक्षाः–२०१६

## बि.ए.२ – विद्वन्मध्यमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -२ , पत्रिका -४

### विषयः - भाट्टदीपिका (३.४अध्यायौ)

**दिनाङ्कः** - 05-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन लिखत** **01 x 10 = 10**

१. तृतीयाध्यायस्य प्रतिपाद्यविषयः कः ?

२. शेषो नाम कः ?

३. श्रुतर्नाम का ?

४. उद्देश्यविशेषणानां विवक्षा अस्ति वा ?

५. स्रुवेणावद्यति इत्यत्र केन प्रमाणेन विनियोगः ?

६. उपव्ययते इत्यत्र विधिशेषा वा अथवा स्वतन्त्रविधिर्वा ?

७. प्रयोज्यत्वं नाम किम् ?

८. उपादेयगताया सङ्ख्याया विवक्षा अस्ति वा ?

९. तस्य व्रतं नेक्षेतेत्यत्र प्रतिषेधो वा पर्युदासो वा इति लिखत ।

१०. प्रयाजशेषेण हवींष्यभिघारयति इत्यत्र हविरभिघारणं किं कर्म भवति ?

**II. वाक्यद्वयेन उत्तरं लिखत** **02 x 05 = 10**

१. अङ्गत्वलक्षणं वदत ।

२. आनर्थक्यतदङ्गन्याये विषयवाक्यं लिखत ।

३. ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यत्र केन प्रमाणेन कुत्र विनियोगः ?

४. स्थानं नाम किम् ? उदाहरणं लिखत ।

५. पुरुषार्थलक्षणं वदत ।

–अनुवर्तते

## III. सङ्क्षेपेण चतुर्णामुत्तरं लिखत 04 x 05 = 20

१. शेषलक्षणं विलिख्य लक्ष्ये योजयत ।

२. 'सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र सूक्तवाकस्य प्रस्तरोद्देशेन प्रहरणमुत प्रहरणाङ्गत्वमिति विवेचयत ।

३. पश्वेकत्वादेर्विवक्षास्ति न वेति विचारयत ।

४. विश्वजिदधिकरणमारचयत ।

५. रात्रिसत्रन्यातमारचयत ।

## IV. उत्तरं लिखत 06 x 10 = 60

१. अरुणाधिकरणमारचयत ।

२. ग्रहगतसङ्ख्यायाः विवक्षा अस्ति न वेति विचारयत ।

३. जञ्जभ्यमानधर्माणां प्रकरणे निवेश्यते न वेति प्रतिपादयत ।

४. कपालानां तुलोपवापाप्रयुक्तत्वम् साधयत ।

५. शाखाच्छेदनं शाखप्रयुक्तत्वं उत नेति विचारयत ।

६. द्रव्यसस्कारकर्मणां क्रत्वर्थत्वं उत पुरुषार्थत्वमिति चिन्तयत ।

—०—

Total No. of Questions : 4 ]    [ Total No. of Printed Pages : 2

**Code No. : MR-27**

# स्नातकपरीक्षाः—२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -१

### विषयः - भाट्टदीपिका (९.१० ४अध्यायौ)

**दिनाङ्कः** - 29-03-2016 ]    [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ]    [ Max. Marks : 100

---

**I. एकवाक्येन लिखत** **01 x 10 = 10**

१. ऊहो नाम कः ?

२. ऊह कस्मिन्नध्याये निरूप्यते ?

३. ऊहः कतिविधः ?

४. मीमांसकमते देवताविग्रहस्वीकारः अस्ति वा ?

५. पत्नीसंयाजान्तत्वं द्वादशप्यहस्सु विधीयते वा ?

६. दशमाध्यायस्य प्रतिपाद्यो विषयः कः ?

७. बाधः कति विधः ?

८. विकृतकृष्णलचरौ अवघातः अस्ति वा ?

९. सत्रे ऋत्विजां वरणं अस्ति वा ?

१०. चरुशब्दस्यौदनवाचित्वं वर्तते वा ?

**II. वाक्यद्वयेन उत्तरं लिखत** **02 x 05 = 10**

१. ऊहस्य विस्तृतलक्षणं लिखत ।

२. विर्वापस्य दृष्टं प्रयोजनं उत न ?

३. साम्नः कुत्राधिरूढः ?

४. बाधो नाम कः ?

५. अस्थियागे मृताधिकारिकः उत जीवदधिकारिकः इति लिखत ।

–अनुवर्तते

## III. सङ्क्षेपेण चतुर्णामुत्तरं लिखत 04 x 05 = 20

१. फलदेवतासम्बद्धधर्माणां अपूर्वप्रयुक्तत्वं उत न विचारयत ।

२. व्रीह्यादिप्रोक्षणादीनां किं प्रयुक्तत्वं लिखत ।

३. स्तोकलक्षणं लिखत ।

४. खलेवाल्यां स्थाण्वाहुतिबाधः अस्ति वा विवेचयत ।

५. कृष्णलचरौ उपस्तरणाभिधारणं वर्तते वा प्रतिपाद्यत ।

## IV. उत्तरं लिखत 06 x 10 = 60

१. ऊहलक्षणं विलिख्य लक्ष्ये योजयत ।

२. अग्निहोत्रादिधर्माणां किं प्रयुक्तत्वमिति साधयत ।

३. विकृतौ मन्त्रे सूर्यनीवारादिपदानामूहः अस्ति वेति विचारयत ।

४. दीक्षणायादिषु अन्वारम्भणीयास्य बाधः अस्ति न वेति प्रतिपदायत ।

५. पृष्ठशमनीयः प्रकृतिविकृतिसाधारणसत्रमात्राङ्गं उत सतोदवसाने निमित्ते नैमित्तिकोऽयं स्वतन्त्रइति विचारयत ।

६. गोदक्षिणायाः विभज्यदानमिति निरूपयत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-28**

# स्नातकपरीक्षाः–२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -२

### विषयः - भाट्टदीपिका (११.१२ ४अध्यायौ)

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकवाक्येन लिखत** **01 x 10 = 10**

१. तन्त्रं नाम किम् ?

२. प्रयाजाद्यङ्गानां क्रतूपकाराख्यफलं प्रति विकल्पेन कारणता उत समुच्चयेन लिखत ?

३. फलकामनायां पुनःपुनः प्रवृत्तिः वर्तते वा ?

४. कपिञ्जलाधिकरणरीत्या बहुत्वस्य कुत्र पर्यवसानम् ?

५. यूपसंस्कारः कथमनुष्ठेयः ?

६. प्रसङ्गो नाम कः ?

७. पुरोडाशे आज्यभागादयः सन्ति वा ?

८. व्रतं नाम किम् ?

९. शालामुखीयसञ्ज्ञायाः नाम किम् ?

१०. उरव्यग्निः कथमुत्पन्नः ?

**II. वाक्यद्वयेन उत्तरं लिखत** **02 x 05 = 10**

१. प्रयाजादीनां एकस्मिन् प्रयोगे सकृदनुष्ठानं वा ?

२. किं आग्नेयादीनां प्रधानानां तन्त्रम् ?

३. आधानं तन्त्रेणानुष्ठेयम् उत न ?

५. सोमाङ्गेष्टिषु अग्न्यन्वाधानं विद्यते वा ?

६. कर्मकाले अध्यायानध्यायरूपाध्ययनधर्माः वर्तन्ते वा ?

–अनुवर्तते

## III. सङ्क्षेपेण चतुर्णामुत्तरं लिखत — 04 x 05 = 20

१. तन्त्रलक्षणं प्रतिपाद्य लक्ष्ये योजयत ।

२. कपिञ्जलाधिकरणमारचयत ।

३. यज्ञपात्राणां तन्त्रस्य नियमः वर्तते वा ?

४. प्रसङ्गलक्षणं विलिख्य उदाहरणे योजयत ।

५. प्रायणीयादिषु पत्नीसन्नहनं विद्यते वा ?

## IV. उत्तरं लिखत — 06 x 10 = 60

१. काम्यकर्मणां भूयोन्यासाधिकरणमारचयत ।

२. कृष्णग्रीवयोः तन्त्रेणानुष्ठानं वर्तते वा ? प्रतिपादयत ।

३. दर्शपूर्णमासेष्टिप्रभृतिषु सङ्घभेदेनाङ्गानां भेदः निरूपणीयः ?

४. कौण्डपायिनामयनेऽग्निहोत्रद्रव्यस्य प्राजहितेश्रपणमिति प्रतिपाद्यत ।

५. दाक्षणीयादिषु अन्वाधानं वर्तते वा ? निरूपयत ।

६. मन्त्रपाठानन्तरमेव पदार्थानुष्ठानमित्यधिकरणमारचयत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-29**

# स्नातकपरीक्षाः—२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

**भागः -१ , पत्रिका -३**

## विषयः - भाट्टकौस्तुभः द्वितीयपादः

**दिनाङ्कः** - 02-04-2016 ] **[ गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. इमानि सूत्राणि व्याकुरुत । (अष्टावेव)** **05 x 08 = 40**

१. तथा फलाभावात् ।

२. अनित्यसंयोगात् ।

३. रूपात्प्रायात्

४. विधौ च वाक्यभेदः स्यात् ।

५. अव्यवस्थाविधीनां स्यात् ।

६. बुद्धशास्त्रात् ।

७. अर्थविप्रतिषेधात् ।

८. अविरुद्धं परम् ।

९. अचेतने अर्थबन्धनात् ।

१०. गुणवादस्तु ।

**II. चत्वारः प्रश्नाः समाधेयाः** **04 x 10 = 40**

१. 'तेन ह्यन्नं क्रियते' इत्यत्र अर्थवादत्वं व्याकुरुत ।

२. मन्त्राधिकरणे सोमेश्वरमतमनूद्य खण्डयत ।

३. नञः प्रवृत्त्यभावप्रयोजनकत्वमिति कौस्तुभोक्तदिशा निरूपयत ।

४. परिसङ्ख्यायां कुत्र त्रैदोष्यं तदभावश्च कुत्र ग्रन्थोक्तदिशा परिशीलयत ।

५. मन्त्राणां अर्थप्रत्यायनार्थत्वे प्रयोजनं किं कौस्तुभोक्तदिशा व्याख्यात ।

६. 'औदुम्बरो यूपो भवति' इत्यत्र न गुणफलसम्बन्धः आश्रयाभावादिति ग्रन्थोक्तदिशा स्पष्टयत ।

–अनुवर्तते

७. अर्थवादविषये वार्तिककारमतं प्रपञ्चयत ।

८. 'तां चतुर्भिरादत्ते' इति मन्त्रस्य वैयर्थ्यमुपपाद्य सार्थक्यं ब्रूत ।

## III. एकेन वाक्येनोत्तरं लिखत 01 x 10 = 10

१. विधिः

२. शाब्दीभावना

३. अर्थवादः

४. मन्त्रः

५. स्तोत्रम्

६. शस्त्रम्

७. सङ्गतिः

८. अध्ययनविधिः

९. व्याप्तिः

१०. आर्थीभावना

## IV. वाक्यद्वयेन उत्तरं लिखत 02 x 05= 10

१. शास्त्रविरोधः कुत्र ग्रन्थे प्रदर्शितः ? लिखत ।

२. 'सृण्येव जर्भरी...' इत्यस्य अर्थः कः ? वदत ।

३. गुणफलसम्बन्धविधिः कुत्र ? प्रदर्शयत ।

४. 'चत्वारि शृङ्गाः' इत्यत्र को वा अर्थः स्वीकृतः ? लिखत ।

५. तादर्थ्यचतुर्थी

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-30**

# स्नातकपरीक्षा:–२०१६

## बि.ए.३ – विद्वन्मध्यमा -तृतीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -४

### विषयः - भाट्टकौस्तुभः तृतीयपादः

**दिनाङ्कः** - 04-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. इमानि सूत्राणि व्याकुरुत । (अष्टावेव)** **05x08 = 40**

१. दर्शनान्द्विनियोगः स्यात् ।

२. एकदेशत्वाच्च विभक्तिव्यत्यये स्यात् ।

३. अन्यदर्शनाच्च ।

४. न स्याद्देशान्तरेष्विति चेत् ।

५. प्रयोगशास्त्रमिति चेत् ।

६. शिष्टाकोपेऽविरुद्धमिति चेत् ।

७. नासन्नियमात् ।

८. तुल्यं तु कर्तृधर्मेण ।

९. आख्या हि देशसंयोगात् ।

१०. हेतुदर्शनाच्च ।

**II. चत्वारः प्रश्नाः समाधेयाः** **04x10 = 40**

१. प्रत्यक्षादिश्रुतिमूलकत्वाभावादेव स्मृतेः अप्रामाण्यमिति साधयत ।

२. षडङ्गानां प्रामाण्यं ग्रन्थे कथं निरूपितम् ? स्पष्टयत ।

३. विरोधाधिकरणे भाष्यकारमतं ग्रन्थोक्तदिशा व्याख्यात ।

४. 'मानाधीना मेयसिद्धिः' इति न्यायः आचमनादि स्मृतिविषये कथं प्रवर्तते । पर्यालोचयत ।

५. 'ब्राह्मणो न सुरां पिबेत्' इत्यत्र पुंस्त्वस्य विवक्षा अस्ति वा न वा ? चिन्तयत ।

६. कल्पसूत्राणां स्वातन्त्र्येण प्रामाण्यं सम्भवति वा ? न वा ? निरूपयत ।

–अनुवर्तते

७. ‘स्थूलपृषती’ इत्यत्र कः समासः ? ग्रन्थोक्तदिशा व्याकुरुत ।

८. ग्रन्थोक्तदिशा अभ्यनुज्ञाविधिविषयं अन्वाख्यात ।

## III. एकेन वाक्येनोत्तरं लिखत 01 x 10 = 10

१. विकल्पः

२. षडङ्गानि

३. शिष्टाः

४. अर्थक्रमः

५. अध्ययनम्

६. सूत्रम्

७. म्लेच्छाः

८. स्तोमः

९. साधुत्वम्

१०. निषेधः

## IV. वाक्यद्वयेन उत्तरं लिखत 02 x 05= 10

१. अष्टदोषदुष्टत्वम्

२. व्याकरणप्रयोजनानि

३. अभ्यनुज्ञाविधिः

४. आत्मतुष्टिः

५. दर्शपूर्णमासौ

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSM-11**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -१

### विषयः - शाबरभाष्यम्- प्रथमाध्यायः

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयोरेव उत्तरं लिखत** **02 x 15 = 30**

१. 'अथातो धर्मजिज्ञासा' इति सूत्रं सभाष्यं व्याख्याय मीमांसायाः प्रयोजनं विलिखत ।

२. 'नन्वतथाभूतमप्यर्थं ब्रूयाच्चोदना, इतीदं भाष्यं ससन्दर्भं व्याकुरुत ।

३. शब्दस्य नित्यत्वं विशदयत ।

४. निरालम्बनवादं मण्डयत ।

**II. षण्णामेव सूत्राणां व्याख्यानं कुरुत** **06x 05 = 30**

१. चोदनालक्षणोऽर्थो धमः

२. कर्मैके तत्र दर्शनात्

३. सतः परमदर्शनं विषयानागमात्

४. आदित्यवद्यौगपद्यम्

५. नादवृद्धि परा

६. वेदांश्चैके सन्निकर्षं पुरुषाख्याः

७. परं तु श्रुतिसामान्यमात्रम्

८. शास्त्रदृष्टविरोधाच्च

९. विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः

१०. तदर्थशस्त्रात्

**III. लघूत्तराणि लिखत** **01x10 = 10**

१. विधिः धर्माधर्मं कथं प्रतिपादयति ? लिखत ।

२. परिसङ्ख्याविधेः लक्षणं उदाहरणं च प्रदर्शयत ।

–अनुवर्तते

३. स्मृतीनां धर्मे प्रामाण्यं कथम् ? विलिखत ।

४. श्रुतिविरुद्धानां स्मृतीनां धर्मे अप्रामाण्यं विलिखत ।

५. नियमविधेः लक्षणं उदाहरणं च विलिखत ।

## IV. वाक्यद्वयेन उत्तरं लिखत **01 x 10= 10**

१. विधिः

२. अर्थवादः

३. निषेधः

४. स्मृतिः

५. वेदः

६. शून्यवादः

७. निरालम्बनवादः

८. शाकाः

९. उपवर्षः

१०. जैमिनिः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSM-12**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -२

### विषयः - भाट्टकौस्तुभः -प्रथमाध्याये चतुर्थः पादः

**दिनाङ्कः** - 29-03-2016 ] **[ गरिष्ठाङ्कः - ८०**

**समयः-** 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयोरेव उत्तरं लिखत** **02x15 = 30**

१. उद्भिदधिकरणं ग्रन्थोक्तरीत्या विलिखत ।

२. चित्रया यजेत पशुकामः । इत्यत्र चित्राशब्दस्य गुणपरत्वं आपाद्य नामधेयपरत्वं उपपादयत ।

३. अग्निहोत्रं जुहोति इत्यत्र अग्निहोत्रपदस्य कर्मनामधेयत्वं विलिखत ।

४. तद्व्यपदेशाधिकरणं ग्रन्थोक्तदिशा विशदयत ।

**II. षण्णामेव सूत्राणां व्याख्यानं कुरुत** **06x 05 = 30**

१. अपि वा नामधेयं स्यात् यदुत्पत्तौ अपूर्वं अविधायकत्वात् ।

२. तद्व्यपदेशं च ।

३. तुल्यत्वात् क्रिययोर्न ।

४. वैश्वदेवे विकल्प इति चेत् ।

५. तत्सिद्धिः ।

६. जातिः ।

७. प्रशंसा ।

८. सन्दिग्धेषु वाक्यशेषात् ।

९. परार्थत्वात् गुणानाम् ।

१०. नामधेये गुणश्रुतेः स्यात् विधानमिति चेत् ।

**III. लघूत्तराणि लिखत** **01x10 = 10**

१. नामधेयस्य प्रयोजनं लिखत ।

२. अग्निहोत्रहोमस्य कालं लिखत ।

–अनुवर्तते

३. श्येनयागस्य अधिकारी कः ?

४. षड्विधिप्रकारेषु षष्ठं विधिं प्रदर्शयत ।

५. चित्रायागस्य फलं किमिति लिखत ।

## IV. एकेन वाक्येन वा वाक्यद्वयेन वा उत्तरं लिखत 01x10= 10

१. मीमांसा

२. अपूर्वम्

३. वेदः

४. इष्टिः

५. अध्वर्युः

६. होता

७. श्येनयागः

८. सोमः

९. पुरोडाशा

१०. वेदिः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSM-13**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -३

### विषयः - शास्त्रदीपिका (चित्राक्षेपपर्यन्ता)

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

## I. लघूत्तराणि लिखत **01x10 = 10**

१. किं नाम निरालम्बनम् ?

२. किं नाम शब्दप्रमाणम् ?

३. धर्मः प्रत्यक्षो न वा ? कुतः ?

४. चोदनासूत्रार्थः कः ?

५. चित्रायागस्य किं फलम् ? तद्बोधकं वाक्यं किम् ?

६. भाट्टमते कति प्रमाणानि ? कानि तानि ?

७. का नाम अर्थापत्तिः ? उदाहरणं लिखत ।

८. बौद्धमते प्रामाण्यमप्रामाण्यस्य कथं जायते ?

९. श्येनयागस्य किं फलम् ? तद्बोधकं वाक्यं किम् ?

१०. वेदाध्ययनं केन वाक्येन विधीयते ?

## II. लघूत्तराणि लिखत **02x 05 = 10**

१. प्रतिज्ञासूत्रे 'धर्मजिज्ञासा'पदस्य विग्रहवाक्यं प्रदर्श्य अर्थं लिखत ।

२. भाट्टमते प्राभाकरमते च वेदाध्ययनस्य प्रयोजनं किम् ?

३. भाट्टप्रभाकरमतयोः वेदाध्ययनं किमङ्गम् ?

४. मीमांसाशब्दार्थः कः ? मीमांसायाः प्रयोजनं किम् ?

५. भाट्टमते कति हेत्वाभासाः ? के ते ?

–अनुवर्तते

## III. षण्णामुत्तराणि लिखत 06x05 = 30

१. वेदाध्ययनस्य अदृष्टार्थत्वं निराकृत्य भाट्टमतेन सिद्धान्तमनुवदत ।

२. उपनयनस्य अध्यापनाङ्गत्वं पूर्वपक्षीकृत्य भाट्टमतसिद्धान्तं सङ्गृह्य लिखत ।

३. चोदनासूत्रं यथाग्रन्थं सङ्क्षेपेण विवृणुत ।

४. धर्मस्य प्रत्यक्षाद्यगम्यत्वं सयुक्तिकं प्रतिपादयत ।

५. प्रामाण्यवादं यथाग्रन्थमनुवदत ।

६. अर्थापत्तिप्रमाणं ग्रन्थोक्तदिशा सङ्क्षेपेण अनुवदत ।

७. शक्तेः पदार्थान्तरत्वं स्थापयत ।

८. उपमानप्रमाणं सङ्क्षेपेण विवृणुत ।

९. शब्दप्रमाणं ग्रन्थोक्तदिशा सङ्क्षेपेण लिखत ।

१०. अर्थापत्तेः प्रमाणान्तरत्वं साधयत ।

## IV. द्वयोः प्रबन्धात्मकमुत्तरं लिखत 02x15= 30

१. अध्ययनविध्यर्थं भाट्टप्राभाकरमतयोर्मतेन सङ्गृह्य विवृणुत ।

२. चित्राक्षेपवादं यथाग्रन्थमनुवदत ।

३. अनुपलब्धेः प्रमाणान्तरत्वं स्थापयत ।

४. बौद्धसम्मतबाह्यार्थशून्यवादमनूद्य तत्र दोषान् प्रदर्शयत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSM-14**

# स्नातकोत्तरपरीक्षा:—२०१६

## एम्.ए.१ — विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्— मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -४

## विषयः - भाट्टरहस्यम्-भावनापर्यन्तम्

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्कः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

## I. लघूत्तराणि लिखत **01x10 = 10**

१. धर्माधर्मयोर्लक्षणं ग्रन्थोक्तं लिखत ।

२. किं नाम वेदबोध्यत्वम् ?

३. तार्किकमते लिङर्थः कः ?

४. यागादेरिष्टसाधनताबोधकमनुमानं किम् ?

५. किं नाम प्रवर्तकत्वम् ?

६. आख्यातार्थस्य मुख्यविशेष्यत्वे किं प्रमाणम् ?

७. किं नाम आप्तत्वम् ?

८. वैयाकरणमते भावशब्दार्थः कः ?

९. किं नाम सकर्मकत्वमकर्मकत्वञ्च ?

१०. लिङः प्रेरणाबोधकं पाणिन्यनुशासनं किम् ?

## II. लघूत्तराणि लिखत **05x 02 = 10**

१. द्वादशलक्षण्यां प्रतिपादितोऽर्थः कः ? किं प्रयोजनम् ?

२. को नाम अभ्यनुज्ञाविधिः ? उदाहरणं लिखत ।

३. भाट्टमते लिङर्थः आख्यातार्थश्च कः ?

४. किं नाम प्राशस्त्यमप्राशस्त्यञ्च ?

५. भाट्टमते धात्वर्थस्य कुत्र प्रकाशतया अन्वयः ? संसर्गः कः ?

–अनुवर्तते

## III. षण्णामुत्तराणि लिखत 06x05 = 30

१. कृतिसाध्यत्वस्य लिङर्थत्वनिराकरणं यथाग्रन्थं विवृणुत ।

२. प्रेरणावादे लिङः विध्यर्थबोधकं पाणिनिसूत्रं सप्रसङ्गं व्याख्यात ।

३. 'ननु किमिदं प्राशस्त्यमप्राशस्त्यं वा' ? इमं प्रघट्टकं विवृणुत ।

४. आख्यातार्थभावनायाः मुख्यविशेष्यत्वं साधयत ।

५. लिङर्थस्य आख्यातार्थकृतावन्वयप्रकारं विवृणुत ।

६. वैयाकरणमते धात्वर्थं निरूप्य ग्रन्थोक्तदिशा खण्डयत ।

७. धात्वर्थस्य भावनायामन्वयप्रकारं प्रदर्श्य एककर्मकत्वं परिष्कुरुत ।

८. तार्किकमते लिङः शक्तित्रयकल्पने कार्यकारणभावकल्पनागौरवं विवृणुत ।

९. बलवदनिष्टाननुबन्धित्वं परिष्कुरुत ।

१०. मतभेदेन धात्वर्थं विमृश्य लिखत ।

## IV. द्वयोः प्रबन्धात्मकमुत्तरं लिखत 02x15= 30

१. धर्मलक्षणं यथाग्रन्थं विवृणुत ।

२. तार्किकसम्मतलिङर्थं निरूप्य तत्र दोषानुद्भाव्य मीमांसकसम्मतलिङर्थं सङ्क्षेपेण विवृणुत ।

३. कर्तृलक्षणावादं यथाग्रन्थं विवृणुत ।

४. तार्किकमते आख्यातार्थं निरूप्य तत्खण्डनापुरस्सरं स्वमतेन आख्यातार्थं स्पष्टीकुरुत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSMG-15**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा -प्रथमवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -२ , पत्रिका -५

### विषयः - स्वशास्त्रेतिहासः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. प्रश्नद्वयस्य उत्तरं लिखत** **02x15 = 30**

१. वेदस्य अपौरुषेयत्वं साधयत ।

२. पार्थसारथिमिश्रस्य कृतिवैशिष्ट्यं ग्रन्थोक्तदिशा निरूपयत ।

३. चोदनैव धर्मे प्रमाणम्- इति सिद्धान्तं साधयत ।

४. ज्ञानस्य स्वतः प्रामाण्यं व्यवस्थापयत ।

**II. षट्प्रश्नाः समाधेयाः** **06x 05 = 30**

१. द्रव्यस्वरूपं ग्रन्थोक्तदिशा निरूपयत ।

२. अन्विताभिधानवादं ग्रन्थोक्तदिशा व्याकुरुत ।

३. शब्दस्य द्रव्यत्वं विभुत्वं च साधयत ।

४. नित्यनैमित्तिककर्मणोः भेदं प्रदर्शयत ।

५. जैमिनेः कालदेशादिकं व्याख्यात ।

६. अभावस्य अनुपलब्धिगम्यत्वं साधयत ।

७. शक्तेः अतिरिक्तपदार्थत्वं व्यवस्थापयत ।

८. ग्रन्थोक्तदिशा प्रत्यक्षभेदं प्रदर्शयत ।

९. जातिव्यक्त्योः भेदाभेदत्वं निरूपयत ।

१०. का वा ख्यातिः ? गुरुमतस्य रीत्या निर्दिष्टं लिखत ।

**III. एकेन वाक्येन उत्तरं लिखत** **01x10 = 10**

१. ब्राह्मणवाक्यम्

२. मीमांसा

–अनुवर्तते

३. शब्दः

४. क्रिया

५. प्रत्यक्षम्

६. प्रमाणम्

७. नियोगः

८. उपवर्षः

९. निर्विकल्पकम्

१०. गुरुमतम्

**IV. वाक्यद्वयेन उत्तरं लिखत** **02x05= 10**

१. त्रिपुटीज्ञानम्

२. कर्ममीमांसा

३. अख्यातिः

४. चतुर्विंशतिर्गुणाः

५. अध्यायविभागाः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSM-11**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -१

### विषयः - आपस्तम्बश्रौतसूत्रम्, दर्शपूर्णमासप्रकरणम्

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

## I. प्रश्नद्वयस्य उत्तरं लिखत **02x15 = 30**

१. एकविंशतिसंस्थस्य यज्ञस्य व्याख्या प्रतिज्ञाता । इति वर्तते ।
के ते एकविंशतियज्ञाः ? विलिखत ।

२. प्रातरग्निहोत्रं हुत्वा अन्यमाहवनीयं प्रणीय अग्नीन् अन्वादधाति इत्यस्य सूत्रस्य अर्थं विलिख्य अग्न्यन्वाधानं विशदयत ।

३. अधिवृक्षसूर्ये वा पिण्डपितृयज्ञेन चरन्ति इत्युक्तं पिण्डपितृयज्ञं यथाग्रन्थं विलिखत ।

४. आज्यभागावन्तरेण इतरा आहुतीर्जुहोति । इत्यस्य सूत्रस्य व्याख्यानं कृत्वा आज्यभागहोमौ कौ ? विशदयत ।

## II. षण्णामेव सूत्राणां व्याख्यानं कुरुत **06x 05 = 30**

१. आघारसम्भेदेन आहुतीः प्रतिपादयति ।

२. यदा वीतार्चिः लेलायतीव वाऽग्निरथाऽऽहुतीर्जुहोति ।

३. प्रधानमेवोपाꣳशु ।

४. अग्नीषोमौ भ्रातृयवान् ।

५. इडामेके पूर्वं समामनन्ति प्राशित्रमेके ।

६. अग्नीत्प्रथमान् होतृप्रथमान्वा ।

७. दक्षिणाग्नावन्वाहार्यं महान्तमपरिमितिमोदनं पचति ।

८. क्षीरे भवतीत्येके ।

९.सहशाखया प्रस्तरमाहवनीये प्रहरति ।

१०. न स्वाहा करोति ।

–अनुवर्तते

## III. लघूत्तराणि लिखत 02x05 = 10

१. अग्निहोत्रशालां अधिकृत्य लिखत ।

२. गार्हपत्यायतनं कथं भवेत् ?

३. आहवनीयकुण्डं कथं भवति ?

४. उत्पवनं नाम किमिति लिखत ।

५. प्रयाजाः के ? विलिखत ।

## IV. एकेन वाक्येन वा वाक्यद्वयेन वा उत्तरं लिखत 01x10= 10

१.दर्शः

२. पूर्णमासः

३. यागः

४. स्रुवः

५. जुहूः

६. प्रैषः

७. सूक्तवाकः

८. अवदानम्

९. पुरोनुवाका

१०. पर्यग्नीकरणम्

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSM-12**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -२

### विषयः - श्लोकवार्तिकम् तर्कप्रकरणे चित्राक्षेपपर्यन्तम्

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. प्रश्नद्वयस्य उत्तरं लिखत** **02x15 = 30**

१. 'चित्रापशुफलत्वादिविषयाश्चोदनामृषा ।
प्रत्यक्षाद्यधिकारेऽपि तैरर्थाऽसङ्गतिर्यतः ।।' इत्यत्र चित्रादिचोदनानां मृषात्वं उक्तं प्रतिपादयत ।

२. 'आकृतिव्यतिरिक्तेऽर्थे सम्बन्धो नित्यतास्य च ।
न सिध्येतामिति ज्ञात्वा तद्वाच्यत्वमिहोच्यते ।।' इत्युक्तं आकृतिसद्भावं प्रतिपादयत ।

३. 'किमौषधं ज्वरस्येति पृष्टो यदि वदेदिदम् ।
येनासौ नश्यतीत्येवं किं तेन कथितं भवेत् ।।' इतीमं श्लोकं ससन्दर्भं व्याख्यात ।

४. 'ज्ञानं मोक्षनिमित्तं च गम्यते नेन्द्रियादिना ।
न च साङ्ख्यादिविज्ञानान्मोक्षो वेदेन गम्यते ।।'
इत्यादिवार्तिकरीत्या आत्मज्ञानं किमर्थमिति विशदयत ।

**II. षण्णामेव व्याख्यानं कुरुत** **06x 05 = 30**

१. 'मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ।।' अस्य श्लोकस्य अर्थं लिखत ।

२. 'उप्तमात्रे न हि व्रीहौ फलमुत्पद्यते क्वचित् ।
अथाङ्कुरोऽपि तत्र स्यात् स्वर्गोऽप्यस्तीति गम्यताम् ।।' अस्य श्लोकस्य तात्पर्यं विलिखत ।

३. 'साक्षादपि सम्बन्धो नात्मनो यज्ञसाधनैः ।
तथापि लक्षणावृत्त्या शरीरद्वारको भवेत् ।।' अस्य श्लोकस्य तात्पर्यं लिखत ।

४. तस्माद्वेदप्रमाणार्थं आत्मात्र प्रतिपाद्यते । इत्युक्तं विशदयत ।

५. शरीरेन्द्रियाद्यतिरिक्तं आत्मानं उपपदायत ।

–अनुवर्तते

६. 'हेतुवृद्ध्यनुसारित्वात् कार्यताऽस्य घटादिवत् ।
नहि दीपसहस्रेऽपि व्यञ्जके वर्धते घटः ।।' अस्य वार्तिकस्य अभिप्रायः कः ? विलिखत ।

७. 'यथा घटादेर्दीपादिरभिव्यञ्जक इष्यते ।
चक्षुषोऽनुग्रहादेवं ध्वनिः स्याच्छ्रोत्रसंस्कृतेः ।।' अस्य वार्तिकस्य तात्पर्यं लिखत ।

८. सम्बन्धपूर्वकत्वं च वाक्यवाक्यार्थयोः स्थितमित्युक्तं श्लोकवार्तिकरीत्या प्रतिपादयत ।

९. 'पश्यतः श्वेतिमारूपं ह्रेषाशब्दं च शृण्वतः ।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ।।' इमं वार्तिकं ससन्दर्भं व्याख्यात ।

१०. अस्य ग्रन्थस्य वैशिष्ट्यं विलिखत ।

## III. लघूत्तराणि लिखत 02x05 = 10

१. वनवादं लिखत ।

२. आकृतिवादं लिखत ।

३. स्फोटवादं लिखत ।

४. अधिकरणं नाम किमिति लिखत ।

५. धर्ममधिकृत्य लिखत ।

## IV. वाक्यद्वयेन वा एकेन वा उत्तरं लिखत 01x10= 10

१. जैमिनिः २. भाष्यकारः

३. वार्तिककारः ४. विधिः

५. वेदः ६. ज्योतिष्टोमः

७. आत्मा ८. शब्दः

९. अपौरुषेयत्वम् १०. चयनम्

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSM-13**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -३

## विषयः - शास्त्रदीपिका

## तर्कप्रकरणे चित्राक्षेपपर्यन्तभागः

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

## I. लघूत्तराणि लिखत **01x10= 10**

१. अर्थवादस्य किं लक्षणम् ?

२. वेदस्य पौरुषेयत्वे युक्तिः का ?

३. अभिहितान्वयवादिनः के ?

४. भाट्टमते काठकसमाख्यायाः अर्थः कः ?

५. अद्वैतमते आत्मा किं स्वरूपः ?

६. मीमांसकमते मोक्षप्राप्तिः कथम् ?

७. प्रत्यक्षविरुद्धं यज्ञायुक्षिवाक्यं किम् ?

८. बौद्धमते कति प्रमाणानि ? कानि तानि ?

९. भाट्टमते पदानां कुत्र शक्तिः ?

१०. स्फोटः कैः अङ्गीकृतः ?

## II. लघूत्तराणि लिखत **02x05 = 10**

१. भाट्टमते शब्दार्थयोः सम्बन्धः कः ? स च नित्यः अनित्यो वा ?

२. चित्रायागस्य अप्रामाण्ये प्रधानयुक्तिः का ?

३. शरीरमेवात्मा इति के वदन्ति ? तत्र युक्तिः का ?

४. भाट्टमते शब्दः गुण उत द्रव्यम् ? स च नित्यः अनित्यो वा ?

५. का नाम भावना ? सा कति विधा ?

–अनुवर्तते

## III. षण्णामुत्तराणि लिखत 06x05 = 30

१. बौद्धमतेन जातिखण्डनयुक्तीः प्रदर्शयत ।

२. वेदापौरुषेयत्वमाक्षिप्य समाधत्त ।

३. शब्दार्थयोः सम्बन्धाक्षेपप्रकारं ग्रन्थोक्तदिशा विवृणुत ।

४. जातिव्यक्त्योः सम्बन्धविषये ग्रन्थानुसारेण लघुटिप्पणीम् आरचयत ।

५. अद्वैतमतखण्डनयुक्तीः ग्रन्थोक्ताः सङ्गृह्य लिखत ।

६. शब्दार्थसम्बन्धस्य नित्यत्वं स्थापयत ।

७. आत्मवादं ग्रन्थोक्तदिशा सङ्क्षेपेण विवृणुत ।

८. मोक्षवादं निरूप्य मीमांसकसम्मतमोक्षस्वरूपं प्रदर्शयत ।

९. बौद्धमतेन जातिखण्डनप्रकारं विवृणुत ।

१०. वैशेषिकसम्मतं शब्दार्थस्वरूपं निरूप्य स्वमतेन तत्खण्डनयुक्तीः सङ्गृह्य लिखत ।

## IV. द्वयोः प्रबन्धात्मकमुत्तरं लिखत 02x15= 30

१. ग्रन्थोक्तदिशा स्फोटवादखण्डनं विवृणुत ।

२. शब्दनित्यत्वाधिकरणं सङ्गृह्य लिखत ।

३. साङ्ख्यमतेन आत्मस्वरूपं निरूप्य स्वमतेन खण्डनयुक्तीः विवृणुत ।

४. चित्राक्षेपपरिहारं ग्रन्थोक्तदिशा सप्रसङ्गं व्याख्यात ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSM-14**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -१ , पत्रिका -४

### विषयः - भाट्टरहस्यम् (प्र.विभक्तिः)

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. प्रश्नद्वयस्य उत्तरं लिखत** **05x15= 30**

१. सुबर्थस्य भावनान्वयं ग्रन्थोक्तदिशा निरूपयत ।

२. रहस्योक्तदिशा कर्मत्वस्य अखण्डत्वं समर्थयत ।

३. खण्डदेवोक्तदिशा षष्ठ्यर्थत्वं व्याकुरुत ।

४. अपादानविषये नैय्यायिकमतं परिशीलयत ।

**II. इमानि सूत्राणि व्याकुरुत (षण्णामेव)** **06x05 = 30**

१. अकथितं च ।

२. सहयुक्तेऽप्रधाने ।

३. स्वतन्त्रः कर्ता ।

४. प्रकृत्यादिभ्य उपसङ्ख्यानम् ।

५. दिवः कर्म च ।

६. इत्थं भूतलक्षणे ।

७. कर्मणा यमभिप्रैति स सम्प्रदानम् ।

८. भुवः प्रभवः ।

९. विभाषा गुणेऽस्त्रियाम् ।

१०. सप्तम्यधिकरणे च ।

**III. वाक्यद्वयेन उत्तरं लिखत** **02x05 = 10**

१. 'पक्व ओदनो भुज्यते' इत्यत्र ओदनस्य कुत्र अन्वयः ?

२. सुपां कर्मादयोत्यर्थाः.......। पूरयत ।

–अनुवर्तते

३. कर्म कति विधम् ?

४. नामगोत्रे.........। पूरयत ।

५. अधिकरणस्य त्रैविध्यं ब्रूत ।

## IV. एकेन वाक्येन उत्तरं लिखत 01x10= 10

१. कर्ता

२. कारकम्

३. लक्षणा

४. स्तोकम्

५. अपदानम्

६. कुशलम्

७. अर्थः

८. अधिकरणम्

९. गतादिस्था

१०. अविग्रहा

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSMG-15**

# स्नातकोत्तरपरीक्षा:–२०१६

## एम्.ए.२ – विद्वदुत्तमा -द्वितीयवर्षः

## शास्त्रम्– मीमांसाशास्त्रम्

### भागः -२ , पत्रिका -५

### विषयः - मानमेयोदयः (प्रमेयभागः)

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. प्रश्नद्वयस्य उत्तरं लिखत** **05x15= 30**

१. मनसः विभुत्वं मेयोक्तदिशा व्याकुरुत ।

२. आकाशस्य अनुमेयत्वं ग्रन्थोक्तदिशा निराकुरुत ।

३. प्रभाकरोक्तकर्माप्रत्यक्षत्वं व्याख्यात ।

४. आत्मलक्षणम् मेयोक्तदिशा निरूपयत ।

**II. षट् प्रश्नाः समाधेयाः** **06x05 = 30**

१.तार्किकोक्तद्रव्यलक्षणं ग्रन्थोक्तदिशा खण्डयत ।

२. रूपस्पर्शयोः त्रैविध्यं मेयोक्तदिशा अन्वाख्यात ।

३. तमोविषये गुरुमतमनूद्य स्वमतं स्थापयत ।

४. मानमेयक्तदिशा वेदस्य पौरुषेयत्वं निराकुरुत ।

५. ग्रन्थोक्तदिशा शब्दस्य अनित्यत्वं निरासयत ।

६. संयोगस्य त्रैविध्यं ग्रन्थोक्तदिशा परिशीलयत ।

७. मेयोक्तदिशा शक्तिस्वरूपं प्रदर्शयत ।

८. अभावः अतिरिक्तपदार्थो वा न वा स्पष्टयत ।

९. ग्रन्थोक्तदिशा भावनास्वरूपं खण्डयत ।

१०. कार्ये एव शक्तिः इति प्राभाकरमतं निराकुरुत ।

**III. वाक्यद्वयेन उत्तरं लिखत** **02x05 = 10**

१. द्रव्यभेदाः कति ?

२. ज्ञानगतप्रामाण्यविषये कतिपक्षाः सन्ति ?

–अनुवर्तते

३. चतुर्विंशतिगुणान् निरूपयत ।

४. पञ्चविधकर्मत्वं ब्रूत ।

५. अभावः कतिविधः ? वदत ।

**IV. एकेन वाक्येन उत्तरं लिखत** **01x10= 10**

१. तेजः

२. वायुः

३. धर्मः

४. मोक्षः

५. गुरुत्वम्

६. समवायः

७. आत्मा

८. मनः

९. प्राकट्यम्

१०. भावना

—०—